# सङ्कलनात्मकमूल्याङ्कनम्–II, 2017

## संस्कृतम्

अवधि : होरात्रयम्　　　　　　कक्षा – सप्तमी　　　　　　पूर्णाङ्काः – शतम्

**Date : 03.03.2017 (Friday)**

**Name of the student _______________________________________ Section ________**

निर्देशाः – 1. सर्वे प्रश्नाः समाधेयाः ।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
3. सर्वेषां प्रश्नानाम् उत्तराणि क्रमणैव संस्कृतभाषायामेव लेखनीयानि ।
4. रिक्तस्थानयुक्तानां सर्वेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत ।

## खण्डः 'क' (अपठितावबोधनम् – 10 अंकाः)

**iz-1 अधोलिखितम् गद्यांशम् पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत –**

वीर शिवाजिमहाराजस्य जनकः श्रीशाहजिः आसीत् । अस्य चरित्र-निर्माणे जननी-जनकयोः, गुरुदेवदादा कोण्डदेवस्य च महान् हस्तः आसीत् । जिजामाता बालशिवाजिराजाय रामायण-महाभारतयोः कथाः कथयति स्म । एवं बालहृदये एव स्वाधीनतायाः ज्योतिः निरन्तरं जाज्वल्यमाना आसीत् । बीजापुरनरेशस्य आदिलशाहस्य सेनापतिः अफजलखानः शिवराजस्य प्रदेशे आक्रमणम् आरब्धवान् । अफजलखानः स्वदूतम् आज्ञापयत् – " अहम् तु शिवराजेन सह वार्त्तां कर्तुम् इच्छामि । तम् एकाकी एव आनय ।" एवम् निर्दिष्टः अपि शिवराजः अजानत् यत् सः शिवराजम् हन्तुम् इच्छति । सः कवचम्, अङ्गवस्त्रम् व्याघ्रनखान् च धृत्वा तेन सह वार्त्तायै तस्य शिविरे अगच्छत् । यदा अफजलखानः शिवराजाय आलिङ्गनम् अददात् छलेन तदा एव सः शिवराजस्य पृष्ठे छुरिकया प्रहारम् कर्तुम् तत्परः अभवत् । परम् तस्य भावम् ज्ञात्वा एव शिवराजेन व्याघ्रनखैः तस्य उदरं विदीर्णम् अकरोत् ।

**I. एकपदेन उत्तरत -** **(½×4=2)**

(क) शिवाजी महाराजस्य जनकः कः आसीत् ? (श्रीशाहजिः / कोण्डदेवः)

(ख) महाभारत-रामायणयोः कथाः का कथयन्ति स्म ? (जिजामाता / भगिनी)

(ग) बीजापुरनरेशः कः आसीत् ? (आदिलशाहः / अफजलखानः)

(घ) आदिलशाहस्य सेनापतिः कः आसीत् ? (शिवाजी / अफजलखानः)

**II. पूर्णवाक्येन उत्तरत -** **(2×2=4)**

(क) अफजलखानः स्वदूतम् किम् आज्ञापयत् ?

(ख) यदा अफजलखानः शिवराजाय आलिङ्गनम् अददात् तदा तेन किम् कपटम् कृतम् ?

**III. गद्यांशस्य उचितमेकम् शीर्षकम् लिखत ।** **(2)**

**IV. निर्देशानुसारं उत्तरत -** **(½×4=2)**

(क) 'अददात्' इति क्रियापदस्य कर्तृपदं किम् ? (अफजलखानः / आदिलशाहः)

(ख) 'छुरिकया' इत्यस्य पदस्य मूलशब्दः कः ? (छुरिकम् / छुरिका)

(ग) 'ज्ञात्वा' इति पदे कः प्रत्ययः ? (तुमुन् / क्त्वा)

(घ) ज्योतिः जाज्वल्यमाना" अनयोः विशेष्यपदं किम् ?

## खण्डः – 'ख' (रचनात्मकं कार्यम् – 20 अंकाः)

**प्र.2 अधोलिखितसंवादे रिक्तस्थानानि मञ्जूषायाः समुचितपदैः पूरयत - (1×5=5)**

छात्राः - गुरवे नमः ।

अध्यापकः - नमस्कारम्, स्वस्थाने.......1.........।

छात्राः - अद्य वयम् कम् पाठम्............2...........?

अध्यापकः - अद्य..............3..........'कश्मीरप्रदेशः' इति पाठम् पाठयामि ।

छात्राः - भो अध्यापक ! किम् भवान्..........4..........अगच्छत् ?

अध्यापकः - आम् ! अयम् प्रदेशः तु पृथिव्याम् .............5..............अस्ति अस्य सौन्दर्यम् तु सर्वेषाम् चित्तम् आकर्षयति ।

| मजूषा | **अहम्, स्वर्गः, तिष्ठत, कश्मीरप्रदेशम्, पठिष्यामः** |
|---|---|

**प्र.3 जन्तुशालाभ्रमणवर्णयन् स्वभगिनीम् प्रति मञ्जूषायाः सहायतया पत्रम् लिखत । (½×10=5)**

छात्रावासतः

रायगढनगरम्

तिथिः 03.03.2017

प्रिय भगिनि,

अत्र छात्रावासे ............1............ कुशलाः स्मः, मन्ये तत्र ............2............ कुशलम् ............3............| ह्यः वयम् सर्वे छात्राः ............4............ जन्तुशालाम् ............5 ............ अगच्छन् । दिल्लीनगरस्य जन्तुशाला तु ............6............ आसीत् । अहम् तत्र सर्वप्रथमम् ऊदबिडालान् ............7............। तत्र श्वेतसिंहाः, केसरिणः, व्याघ्राः ............8............ भ्रमन्ति स्म । जिराफाः, गजाः, मृगाः इत्यादयः तु स्वतन्त्राः ............9............ स्म । वयम् दूरतः एव तान् ............10............ तत्र अनेके विचित्राः पक्षिणः अपि पञ्जरे विलसन्ति स्म । अहम् त्वाम् अपि कदाचित् इमाम् जन्तुशालाम् नेष्यामि । मातृपितृचरणयोः शतप्रणामाः ।

भवदीयाग्रजः

समयः

मजूषा – 

| अपश्याम, पञ्जरे, भ्रमन्ति, अपश्यम्, विशाला, द्रष्टुम्, दिल्लीनगरस्य, सर्वम्, वयम्, अस्ति |
|---|

प्र.4 **अधोलिखितम् चित्रं मञ्जूषायाः सहायतया पञ्चवाक्येषु वर्णयत -** **(2×5=10)**

मजूषा – 

| वायुयानस्थलस्य, जनाः, अवतरन्ति, शीघ्रम् गन्तुम्, यात्राम्, इच्छन्ति, इतः-ततः, बसयानम्, तिष्ठति, एतत् चित्रम्, उड्डयति, बहवः |
|---|



## खण्डः 'ग' (अनुप्रयुक्तव्याकरणम् – 20 अंकाः)

प्र.5 **मञ्जूषातः उचितरूपं चित्वा शब्दरूपेषु रिक्तस्थानपूर्तिं कुरुत -** **(1×4=4)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | ....1....... |
| द्वितीया | ...2... | नद्यौ | नदीः |
| तृतीया | धेन्वा | ....3....... | धेनुभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | .....4........ |

मजूषा – 

| वारिभ्यः, पितरः, धेनुभ्याम्, नदीम् |
|---|

प्र.6 **मञ्जूषातः उचितधातुरूपं चित्वा शब्दरूपेषु रिक्तस्थानपूर्तिं कुरुत -** **(1×4=4)**

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| (क) | प्रथमपुरुषः | गच्छतु | गच्छताम् | .....1..... |
| | मध्यमपुरुषः | ......2..... | नमेतम् | नमेत |
| | उत्तमपुरुषः | स्मराणि | .....3....... | स्मराम |
| (ख) | प्रथमपुरुषः | भवेत् | ......4...... | भवेयुः |

मजूषा – | स्मराव, गच्छन्तु, नमेः, भवेताम् |

**प्र.7 अधोलिखितानि रिक्तस्थानानि कोष्ठक-प्रदत्तैः समुचितपदेन पूरयत -** **(1×4=4)**

(क) माता..................अभिलषति। (बालकी / बालके)

(ख) ....................पुरतः उद्यानं अस्ति। (विद्यालयस्य / विद्यालये)

(ग) छात्रः ................प्रमाद्यति। (पठति / पठनात्)

(घ) ...................स्वाहा। (रामम् / रामाय)

**प्र.8 अधोलिखितेषु प्रकृति-प्रत्ययविभागम् चित्वा लिखत -** **(1×4=4)**

(क) ज्ञातव्य -

(अ) ज्ञात+क्त्वा (ब) ज्ञातव+तव्य (स) ज्ञा+तव्यत्

(ख) दर्शनीय -

(अ) दर्श+अन (ब) दर्शन्+तुमुन् (स) दृश्+अनीयर्

(ग) गन्तुम् -

(अ) गन्+क्त्वा (ब) गै+तुमुन् (स) गम्+तुमुन्

(घ) अनुभूय -

(अ) अनु+भू+ल्यप् (ब) अन्+ब्रू+ल्य (स) अनु+भुव+शतृ

**प्र.9 अधोलिखितानि रिक्तस्थानानि कोष्ठक-प्रदत्तैः समुचितपदेन शुद्धं कृत्वा पूरयत -** **(1×4=4)**

(क) माता भोजनम्................। (पचेयुः / पक्ष्यति)

(ख) तव...............आगतौ। (सखायौ / सखौ)

(ग) सः गुरुम्........................। (नमेम / नंस्यति)

(घ) कृष्णाः...............आगच्छन्ति। (सर्पाः / सर्पान्)

## खण्डः 'घ' (पठितावबोधनम् – 50 अंकाः)

**प्र.10 अधोलिखितं गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

मेघनादः अवदत् - 'यथाहं कथयामि तथा कुरुतम्। मक्षिके! प्रथमं त्वम् गजस्य कर्णे शब्दं कुरु, येन सः नयने निमील्य स्थास्यति। तदा काष्ठकूटः चञ्च्वा तस्य नयने स्फोटयिष्यति। एवं सः गजः अन्धः भविष्यति। तृषार्त्तः सः जलाशयं गमिष्यति। मार्गे महान् गर्त्तः अस्ति। तस्य अन्तिके अहं स्थास्यामि शब्दं च करिष्यामि। मम शब्देन तम् गर्तं जलाशयं मत्वा स तस्मिन्नेव गर्ते पतिष्यति मरिष्यति च।' अथ तथा कृते सः गजः मध्याह्ने मण्डूकस्य शब्दम् अनुसृत्य महतः गर्तस्य अन्तः पतितः मृतः च। तथा चोक्तम् – "बहूनामप्यसाराणां समवायो हि दुर्जयः"।

**(I) एकपदेन उत्तरत -** **(1×4=4)**

(क) तृषार्त्तः गजः कुत्र गमिष्यति ? (जलाशयं / समुद्रं)

(ख) कस्य शब्देन गजः गर्तं जलाशयं अमन्यत् ? (चटकायाः / मेघनादस्य)

(ग) कः अन्धः भविष्यति ? (गजः / सर्पः)

(घ) सः गजः कदा गर्तस्य अन्तः पतितः ? (सायंकाले / मध्याह्ने)

**(II) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

(क) मेघनादः मक्षिकां किम् अवदत् ?

(ख) काष्ठकूटः कया गजस्य नयने स्फोटयिष्यति ?

**(III) निर्देशानुसारं उत्तरत –** **(1×2=2)**

(क) 'मत्वा' इति पदे कः प्रत्यय ? (तुमुन् / क्त्वा)

(ख) 'जीवितः' इति पदस्य किम् विलोमपदं अत्र प्रयुक्तम् ? (पतितः / मृतः)

**प्र.11 अधोलिखितानाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -** **(2×5=10)**

(क) हरिणः किम् खादति ? (नवघासम् / रोटिकासु)

(ख) सङ्गणकस्य कृते सर्वोत्तमा भाषा का अस्ति ? (संस्कृतभाषा / आंग्लभाषा)

(ग) कीदृशी वाणी पुरुषं समलङ्करोति ? (असंस्कृता / संस्कृता)

(घ) वयं कीदृशं सोपानं रचयाम ? (हिमवन्तम् / धनवंतम्)

(ङ) अशोकचक्रे कति अराः सन्ति ? (चतुर्विंशतिः / त्रिंशत्)

**प्र.12 अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×5=5)**

(क) <u>शत्रूणाम्</u> समक्षं विजयः सुनिश्चितः भवेत् ।

(ख) कालेन <u>चटकायाः</u> सन्ततिः जाता ।

(ग) <u>विद्या</u> राजसु पूज्यते ।

(घ) <u>वरिष्ठान्</u> प्रति अस्माभिः प्रियं व्यवहर्त्तव्यम् ।

(ङ) जनाः सर्वकाराय <u>देशस्य</u> विकासार्थं धनं प्रयच्छन्ति ।

**प्र.13 अधोलिखितानाम् पदानाम् विभक्तिं वचनं च लिखत -** **(1×5=5)**

| | विभक्तिः | वचनम् |
|---|---|---|
| (क) भल्लुकैः | ............ | ............. |
| (ख) जनकेन | ............ | ............. |
| (ग) गुरूणाम् | ............ | ............. |
| (घ) रक्षायाम् | ............ | ............. |
| (ङ) मतिषु | ............ | ............. |

**प्र.14 अधोलिखितानि रिक्तस्थानानि मञ्जूषायाः सहायतया पूरयत -** **(1×5=5)**

मजूषा – **तानि, भ्रातरौ, सारनाथे, अत्रोटयत्, सूर्ये**

(क) गजः शुण्डेन वृक्षशाखाः ........................।

(ख) ..............पत्राणि सुन्दराणि सन्ति।

(ग) उदिते.............धरणी विहसति।

(घ) तव................कुत्र जीविकोपार्जनं कुरुतः।

(ङ) अशोकस्तम्भः ...................अस्ति।

**प्र.15 मञ्जूषातः विलोमपदानि चित्वा लिखत -** **(1×5=5)**

मजूषा – **कठोरः, चित्वा, उदारचरितानाम्, गृहीत्वा, क्षिप्रम्**

(क) विकीर्य ........................

(ख) अपहाय ........................

(ग) मन्दम् ........................

(घ) स्निग्धम् ........................

(ङ) लघुचेतसाम् ........................

**प्र.16 मञ्जूषातः समानार्थकपदानि चित्वा लिखत -** **(1×5=5)**

मजूषा – **परिवारः, चन्द्रः, विपिने, स्वकीयम्, अम्बुदः**

(क) वने ........................

(ख) आत्मानम् ........................

(ग) कुटुम्बकम् ........................

(घ) जलदः ........................

(ङ) निशाकरः ........................

**प्र.17 कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानानि पूरयत -** **(1×5=5)**

(क) पर्वतशिखरम्................आकर्षकं दृश्यते। (अम्बुदमालासु / अम्बुदमालया)

(ख) .................किम् नाम अस्ति ? (तव / युष्माभिः)

(ग) ................नमः। (अम्बां / अम्बायै)

(घ) ...............कृषकाः कृषिकर्माणि कुर्वन्ति। (चत्वारि / चत्वारः)

(ङ) अहं प्रातः .................सह भ्रमणाय गच्छामि। (पितृभ्यः / पित्रा)